International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 79-81
© 2020 IJSR
www.anantaajournal.com
Received: 16-11-2019
Accepted: 20-12-2019

**मानस रंजन पति**
शोधच्छात्रः, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठम्, नई दिल्ली, भारत।

**Corresponding Author:**
**मानस रंजन पति**
शोधच्छात्रः, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठम्, नई दिल्ली, भारत।

# बौद्धार्थविवेचनम्

## मानस रंजन पति

**प्रस्तावना**

पवित्रतमपदार्थः ज्ञानम्। ''न हि ज्ञानेनसदृशं पवित्रमिह विद्यते'' [1] इति श्रीमद्भगवद्गीतावचनानुसारेण सकले ब्रह्माण्डे ये पदार्थाः विद्यन्ते तेषु ज्ञानम् अन्यतमम्। वेदो हि ज्ञानस्य मूलम्। अतः ज्ञानार्थं वेदरक्षणमावश्यकम्। षडङ्गानि विद्यन्ते वेदस्य। तेषु मुख्यम् व्याकरणम्, प्रधानं च। ''प्रधाने तु कृते यत्ने फलवान् भवति'' इति महाभाष्यवचनम्। यद्यपि प्राचीनकालादेव बहवः ऋषयः यथा–ऐन्द्रं चान्द्रं, कौमारं, शाकटायनम् इत्यादि व्याकरणस्य व्याख्या कृतवन्तः परन्तु तेषु पाणिनि मुख्यः। व्याकरणशास्त्रे शब्दानां द्विधा विभागो वर्तते, साधुशब्दानामसाधुशब्दानां च। शास्त्रानुमोदनपूर्वकं येषां शब्दानां प्रयोगो भवति ते साधुशब्दाः। तद्भिन्नाः असाधुशब्दाः। येनोच्चारितेन सास्नालाङ्गूल ककुदखुरविषाणिनां सम्प्रत्ययो भवति सः शब्दः। अर्थबोधकत्वेनैव शब्दाः प्रतिपादिकत्वेन प्रत्ययोत्पत्त्या च साधुत्वं गच्छन्ति। शब्दस्यार्थेन सह सम्बन्धसत्वात् शब्दानामर्थवाचकत्वेन अर्थवत्वात् प्रतिपादिकसंज्ञा भवति। अपभ्रंशार्थवाचकानां पदानां तदर्थेन सम्बन्ध सत्वात् अपभ्रंशार्थबोधकत्वेन तत्संज्ञाद्वारा साधुत्वं भवति। परन्तु अत्र शंका उदेति यत् अपभ्रंशानां तथा साधितेऽपि तत्र अप्रसिद्धार्थवतां शब्दानामर्थेन सह कथं सम्बन्धो भवति? अर्थेन सह सम्बन्धाभावादेव अर्थवत्वविरहेण पुनस्तत्र ''अथर्ववदधातुरप्रत्ययः प्रतिपादिकम्'' [2] इति अर्थवत्वोद्देश्यकप्रातिपादिक संज्ञा च कथं भवतीति? तत्र अप्रसिद्धार्थवन्तः शब्दाः यथा–

एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।
कूर्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः।। [3]

अत्र लोकव्यवहारे शास्त्रे वा वन्ध्यासुतपदप्रतिपादितार्थस्य अप्रसिद्धिः, एवमेवाऽन्येषु पदेष्वपि तथैव दृश्यते। अतः साधु शब्द ज्ञापकशास्त्रत्वम् व्याकरणम् इति। अतः पाणिनीय व्याकरणमेव साधु। तत्र किमिदं व्याकरणम्? उच्यते, शब्दनिष्ठसाधुत्वज्ञान जनकशास्त्रत्वम् इति व्याकरणस्य लक्षणं वेदितव्यम्। अपरं च 'लक्ष्ये लक्षणं व्याकरणम्' इति महाभाष्योक्त्याऽपि लक्ष्यगतसाधुत्वलक्षणशास्त्रत्वमेव व्याकरणस्यासाधारणधर्मो बोध्यते।
आचार्येण श्री भर्तृहरिणाऽप्युच्यते–

''साधुत्वज्ञानविषया सैषा व्याकरण स्मृतिः'' [4] इति

**अपरं च–**

तस्मान्निबध्यते शिष्टैः साधुत्वविषया स्मृतिः व्याकरणशास्त्रे श्रीनागेशभट्ट विरचितः ''वैयाकरणसिद्धान्तलघुमञ्जूषा'' इति कश्चित् विशिष्टः ग्रन्थः। यदा आचार्येण परमलघुमञ्जूषाग्रन्थेन सन्तोषम् न आप्नुवन् तदा ते सिद्धान्त लघुमञ्जूषा ग्रन्थं व्यरचयन्। तत्र बहवो गहनतमाविषयाः विनियोजिताः, तेषु बौद्धार्थः अन्यतमः। अत्र आचार्येण परमतखण्डनेन साकं स्वमतस्थापनापि कृता।
पदपदार्थयोः सम्बन्धः कः इतिजिज्ञासायां श्री नागेशभट्टः पदपदार्थयोः तादात्म्यसम्बन्धोऽस्तीति प्रतिपादयति। तादात्म्यं च ''तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्'' इति सिद्धान्तम्। एवं वास्तविकः भेदो विवर्तावस्थायां भवति, अभेदस्तु बुद्धि परिकल्पितः, संवर्न्तावस्थायान्तु अभेदो वास्तविकः, भेदस्तु बुद्धिपरिकल्पितो भवतीति, भेदसत्वेऽपि अभेदेन प्रतीयमानत्वं सङ्गच्छत इति प्रतिपादितम्। यथात्र नागेशः वस्तुतो बौद्ध एवार्थः शक्यः पदमपि बौद्धं तयोरभेदः''
एवं च सर्वोऽपि पदपदार्थो बुद्धिपरिकल्पित एव गृह्यत इति बौद्धपदस्य बौद्धपदार्थेन सह सम्बन्धः सोऽपि बौद्ध एव। एवं च वन्ध्यासुतपदस्य पदार्थत्वेन वास्तविके लोकव्यवहारे कस्याप्यर्थस्याप्रसिद्धेः स्थिति

सत्वेऽपि बौद्धे तु वन्ध्यायाः प्रसिद्धिः, सुतस्य च प्रसिद्धिरस्तीति तथैव तस्य वन्ध्यासुतपदस्य अर्थवत्वेन प्रतिपादिकसंज्ञा सुबादि व्यवहारश्च भवति। बुद्ध्युपारूढस्य शब्दार्थत्वसमर्थनं स्वीकृत्यैव तत्र ''ध्रुवमपायेऽपादानम्'' [5] इति सूत्रस्य ''मथुराः पाटलीपुत्रकेभ्यः आढयतराः'' इति प्रयोगे बुद्धिकृतमपादानसंज्ञाया आवश्यकत्वात् बुद्धिकृतावधित्वेनैव कार्यनिर्वाहे अनावश्यकतया भाष्यकारेण खण्डनं विहितम्, इति यथा अवध्यादयः सुबर्थाः बुद्धिकृताः, बुद्ध्युपारूढास्तथैव पदपदार्थादयोऽपि इति भाष्यकृतमपादानसंज्ञाविधायकसूत्रखण्डनमपि भवत्यत्र प्रमाणम्।

बौद्धार्थं प्रतिपादयन् आचार्यः नागेशः आदौ कथयति–

''एवं शक्योऽर्थोऽपि बुद्धिसत्तासमाविष्ट एव न तु बाह्य सत्ताविष्टः [6] अर्थात् यथा अन्तरः स्फोटो निर्माणो वाचकः, एवं वाच्योऽप्योन्तरो निर्विभागः, स एव वाक्यार्थः स च प्रतिभारूप इत्यर्थः। अत्र घट इत्यत एव सत्तायाः अवगमेन घटोऽस्तीति प्रयोगे गतार्थत्वादस्तीति प्रयोगानापतेः सत्तयाविरोधात्, घटो नास्तीत्यस्यानापत्तेश्च। अत एव 'अत्राभावज्ञाने आहार्यमेव प्रतियोगिज्ञानं करणम्' आद्ये विरोधो द्वितीये बाधः, सत्ताया द्वितीय भाव विकारत्वात्। एतेन बुद्धि सत् शशश्रृङ्गं बाह्यरूपेण नास्तीति तदर्थोऽपि सूचितः।
बौद्ध पदार्थः अद्वैत वेदान्त सम्मतम् यथा नामरूपात्मकं जगत् चेतनकर्तृकम्। अतएव इदं तल्लक्षणम्। अस्य दृश्यस्य प्रपञ्चस्य वो जन्मादि जन्मस्थितिनाषा यतो यस्मात् येन यस्मिंश्चि तद् ब्रह्मेत्यनुकर्षः। 'य तो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यमिसंविशन्ति'' [7] इति श्रुत्यनुरोधात्।
नैयायिकाः बौद्ध पदार्थः विषये कथयन्ति यत्– लौकिकचाक्षुषं प्रत्येव चक्षुसंयोगादेः हेतुतया अलौकिक चाक्षुषं ज्ञानलक्षण्येव सिद्धम्। तथाहि– 'घटोनास्ति' इत्यत्र अभावांशे घटस्य 'सोऽयम्' इति प्रत्यभिज्ञायां तत्रांशस्य, 'सुरभि चन्दनं पश्यमि' इति सौरभांशस्य मानं न संभवति, इन्द्रियसम्बन्धभावात्' अतः तद् विषयक ज्ञानमेव सम्बन्ध, अस्ति च बाह्य रजतज्ञानं शुक्तौ अपि इति मतं निराकरोति।
परन्तु नैयायिकानामुक्तं भाष्यविरुद्धं भवति यथा' ''स्त्रियाम्'' [8] इति सूत्रे, खट्वादौ स्तनकेशादि अदर्शनेन लिङ्गाभावोट्टापोऽनुपपत्तिमाशङ्क्य आह–

''अस्तु मृगतृष्णावद् गन्धर्वनगरं यथा।

अर्थात्– खट्वायाम् लिङ्गं न दृश्यते वृक्षेऽपि लिङ्गं न दृश्यते तर्हि कथमत्र स्त्रीलिङ्गः पुल्लिङ्गः भविष्यति अतः आह– यथा मृगास्तृषिता अपां धाराः पश्यन्ति, परन्तु तत्र जलं नास्ति, यथा गन्धर्वनगराणि दूरतो दृश्यन्ते। परन्तु उपसृत्य च नोपलभ्यन्ते तथैव बौद्धस्यैव भानमिति स्पष्टम्। अत्र भतृहरिरपि आह–

यथा सलिलनिर्भासो मृगतृष्णासु जायते।
जलोपलब्ध्यनुगुणाद्वीजादबुद्धि जलेऽसति।।

अर्थात्– मृगतृष्णासु जलस्य निर्भासो जायते परन्तु जलाभावे तत्र निर्भासो कथम्? अत्रापि बुद्धौ यद् जलम्, तदैव अर्थात् तस्मिन्नसत्यपि तादृशाद् बीजाद् बुद्धिरित्यर्थः अतः बुद्धिस्थपदार्थाङ्गीकर्त्ताशयः।
बौद्धार्थविषये व्यासोऽपि आह– ''मायामात्रं तु कात्स्न्र्येवानभिव्यक्तेः'' अर्थात्– मायायां उचितदेशकालादिसम्पत्या बाधाभावेन न हि रथादीनामुचितो देशः स्वप्ने सम्भवति, देहान्तर्नाडीप्रविष्टमनोऽवछिन्न साक्षिभिन्नस्य तदानीमसत्त्वात् नाप्युचितः कालोऽस्ति, घटिकामात्रवर्तिनि स्वप्ने अनेकसंवत्सरसाध्यसंसारस्य दर्शनात्। तस्मात् प्रातिभासिक एव स्वप्नप्रपञ्चेति। नन्वेतावता तस्य तत्त्वे इष्टेऽपि बाह्यस्य तत्वं नाभिमतं तस्य किञ्चित्स्वोक्तिविरुद्धम् अपि इदं स्वयमेव तत्तुल्यप्रतिपादितम्।
ब्रह्माभेदेपि जगति लोकदृष्टान्तेन विरोध परिहारे लौकिकयोः कार्यकारणयोरिव ब्रह्मप्रपञ्चयोरपि समानसत्ताकत्वं स्यात्। तस्य प्रपंचस्य ब्रह्मणोऽनन्यत्वमारभण शब्दादिभ्यः। एक विज्ञानेन सर्वविज्ञानं प्रतिज्ञाय यथा– ''सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'' इति। विकारः सर्वोऽपि वाचाऽऽरभते 'राहोः शिर' इतिवत्। यद्वा वाचः शब्दस्याऽऽरम्भणं हेतुर्न तु तत्त्वतोऽस्ति यतो नामधयमात्रम्। अत्र नामधेय शब्देन तत्कारणको व्यवहारो लक्ष्यते। मृदादिकारणेभ्यो भेदाभेदाभ्यामनिर्वचनीयत्वात्, भेदे सत्कार्यवादहानिः, अभेदे कारणव्यापारवैयर्थ्यम्, उत्पत्तेः पूर्वमसत्स्वभावं नरविषाणवत्पश्चात्तु सदित्यस्याप्ययुक्तत्वान्नीलरूपस्यपीतरूपत्वं च मृदः स्वविकारापेक्षया। तथा सत्यज्ञानादि रूपत्वेन ब्रह्मणि ज्ञाते विकारोऽप्यसत्यो ब्रह्मैव सत्यमिति ज्ञानम्।
अपरं च अनन्यत्वेऽपि कार्यकारणयोः कार्यस्य कारणात्मत्वं न तु कारणस्य कार्यात्मकत्वम्' इति ''न तु दृष्टान्तभावाद्'' इति सूत्रे भाष्यकारेण उक्तम्। अत्र न च ''न तत्र रथः न रथयोगः न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते'' इति स्वप्न विषयश्रुत्युक्तसृष्ट्यसङ्गतिरिति वाच्यम्। अर्थात्– एषा स्पाप्नसृष्टिमायैव केवलम्, जाग्रद्विषयसर्वपुरुषसाधारण्येनार्थक्रियाकारित्वेन स्थिरत्वेन चानभिव्यक्तस्वरूपत्वात् यद्यपि व्यवहार सृष्टिरपि मायैव, तथापि दृष्टोत्पादक–विनाशकसामग्रीकल्पनाद्वारैवैषा मायाशक्तिः, द्वितीया तु मनादिसापेक्षतच्छक्तिरिति। ते च स्वप्नाः पदार्थाः मनः परिणामाः। बहिरनुपलभ्यमानाकाश बुद्धिवृत्तिरेव भ्रमः व्यवहारदशायाम्। शुक्तिरजतमपिशुक्त्यवच्छिन्नान्तः करणपरिणाम एव। अस्य सूत्रस्य च स्वाप्नवत् जाग्रत्प्रपञ्चेऽपि ब्रह्मापेक्षया तुच्छत्वप्रतिपादनं फलम्।
बौद्धार्थविषये श्री हर्षेणाप्युक्तम्– ''परकीयरीत्येदमुक्तम्–अनिर्वचनीयत्वं विश्वस्य पर्यवस्यति इति। श्रीमद्भागवतेऽपि उक्तम्–

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयते चात्मनि।
तद्विद्यादात्मनो मायां यथाऽभासो यथा तमः।। [9]

यद् विनाप्यर्थमात्मन्यधिष्ठाने प्रतीयते यच्चात्मरूपे न प्रतीयते, तत प्रत्ययाप्रत्ययरूपमात्मनो मायां विद्यात्। यथा आभासो–द्विचन्द्रादिः, यथा च तमो–राहुग्रहमण्डले सन्नपि न प्रतीयत इत्यर्थः।
अनेन माया निरुपणं क्रियते 'यथात्ममायायोगेनेत्यनेन तस्य अपि पृष्टत्वाद्वक्ष्यमाणोपयोगित्वाच्च' इति श्रीधरोक्तेः यदित्यस्य यस्मादित्यर्थकत्वप्रतीत्या वासनापरतया कथं प्रकृतोपयुक्तत्वमिदम् ततः आह– अक्षरस्वारस्येन संनिधिना नपुंसकनिर्देशेन चायमेवार्थः इति।
बौद्धार्थं निरूपयन् बृहन्नारदीये–

नासद्रूपा न सद्रूपा माया नैवोभयात्मिका।
अनिवाच्या ततो ज्ञेया मिथ्याभूता सनातनी।। इति।

अर्थात्– व्यवहारकाले सत्वेन प्रतीतेर्न केवलमसद्रूपा। प्रतिक्षणं परिणामितया प्रतीतेबांधदर्शनाद्विशेषदर्शनबाध्यत्वाच्च न केवलं वास्तवसद्रूपा। अत एव वास्तवोभयरुपाऽपि न विरोध कारणात्। अत एव अनिवाच्या सत्येवासत्येवेति निर्धार्य वक्तुमशक्या।
तत्र बौद्धपदार्थस्वीकारे सति वक्त्रा गौरित्युच्यार्थमाणे श्रोतुः बौद्धपदार्थे तस्य गो शब्दस्य सम्बन्धः कथं भवतीति जिज्ञासा आपतति अतः भर्तहरिः–

सम्बन्धशब्दे सम्बन्धो योग्यतां प्रतियोग्यता।
समयाद्योग्यतासंविन्मातापुत्रादियोगवत्।। [10]

इत्यादि कारिकामाध्यमेन शब्दार्थयोः योग्यतां सम्बन्धं प्रतिपाद्य पदपदार्थयोः कार्यकारणभावं प्रदर्शयितुं प्रतिपादयति–यथा

शब्दः कारणमर्थस्य स हि तेनोपजन्यते।
तथा च बुद्धिविषयादर्थाच्छब्दः प्रतीयते।। [11]

अस्याः कारिकायास्त्वयमर्थो यथा– तत्र हि वक्तृबुद्धिश्चः शब्दः संकल्पात्मकत्वेन अवस्थितः श्रोतृबुद्धिस्थस्यार्थस्य वक्त्रा वाचकत्वभिप्रायेण स्थानकरणव्यापारैः अभिव्यञ्जितः श्रोतृविषयमनुप्राप्तस्सन् कारणं भवति। यतो हि श्रोतृबुद्धिस्थस्यार्थस्योद्बोधकत्वं वक्तृप्रयुक्ते शब्दे आयातीति जनकत्वं तस्य सिद्धयति।
एवं च वक्त्रा स्थानकरणव्यापारैरभिव्यञ्जितो विषयत्वेन श्रोतृश्रुतिमापन्नः अर्थेन सह सामानाधिकरण्यं भजत इति कार्यरूपस्यार्थप्रतीतेः कारणरूपस्य च शब्दस्य सामानाधिकरण्यं भवतीति कार्यकारणभाव उपपद्यते, अस्मिन् विषये ब्रह्मकाण्डे भर्तृहरिर्यथा–

आत्मभेदस्तयोः केचिदस्तीत्याहुः पुराणगाः।
बुद्धिभेदादभिन्नस्य भेदमेके प्रचक्षते।। [12]

अपरं च वक्तृबुद्धिस्थः शब्दोऽर्थप्रत्यायने कथं कारणं भवतीति भर्तृहरिणा इत्थं प्रतिपादितम्। यथा–

अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम्।
तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक्।। [13]

अम्बाकर्तीकारेण विषयोऽयं अनेन श्लोकेन कथयति यथा–

कार्यात्मनो तु नानात्वमभेदः कारणात्मना।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा।। [14]

अथ च शब्दस्य बुद्धिस्थत्वं निमित्तप्रत्यायकयोः शब्दार्थयोः कथं सिद्धयति जिज्ञासायां प्रतिपादयति–

वितर्कितः पुरा बुद्धया क्वचिदर्थे निवेशितः।
करणेभ्यः विवृत्तेन ध्वनिना सोऽनृगृह्यते।। [15]

इत्थं शब्दार्थयोः कार्यकारणभावः समवस्थितः। एवं चोच्चारणात्प्रागपि वक्तृबुद्धावेव शब्दस्य, अर्थस्य च सामानाधिकरण्यं भवति।
एवं रीत्या बुद्धिस्थ एव शब्दः बुद्धिस्थस्यार्थस्य कारणम्, बुद्धिस्थ एवार्थो बुद्धिस्थस्य शब्दस्य कारणमिति परस्परं तयोस्सामानाधिकरण्यं कार्यकारणभावाश्च सिद्धयति। एवं च बाह्यार्थतादात्म्येनावसीयमानो अध्यायस्यमानो वाऽर्थोऽपि बौद्ध एवार्थः। एवमेव शब्दोच्चारणपूर्वमेव वक्तृबुद्धौ शब्दस्य योऽर्थो विवक्षितस्तस्य बलात् स्थानकरणाद्यभिघातेन जायमानः शब्दः स्वोपादानकर्थस्य प्रकाशको विद्युदादिप्रकाशवद् श्रोतृबुद्धिस्यमर्थं प्रकाशयति शब्दोऽर्थस्य, अर्थोऽपि शब्दस्य कारणम्। एवं च शब्दार्थयोरूभयोरपि परस्परं कार्यत्वं कारणत्वं च वर्णितं भवति–इति धूमाग्न्योः कार्यकारणभावतो वैलक्षण्येन शब्दार्थयोरभेदेन तादात्म्याध्यासलक्षणः सम्बन्धः समवस्थितो भवति।
कथं तर्हि बुद्धिस्थोऽर्थः बुद्धिस्थस्य शब्दस्य तद्वैपरीत्येन च शब्दोऽर्थस्य कारणं भवति। अनेन च पूर्वमुपस्थापितानां वन्ध्यासुतादौ प्रतिपादिकत्वाभावादिदोषाणां निराकरणं च अवश्यमेव भवति। तत्र वक्तृविवक्षानुसारमेव अर्थबोधः कथं भवतीति प्रश्ने तु इदमुत्तरयितुं शक्यते यत् विवक्षातः पूर्वमप्यर्थज्ञानस्य स्थितिर्दृश्यते। एवं च श्रोतुः बुद्धौ यादृशी आथीर्वासना वर्तते तादृशी परिकल्पैव वक्त्रा स्वाभिप्रेतार्थसम्मिश्रः शब्दः प्रयुज्यते। अर्थमजानन्तं शब्दोपदेशस्यानौचित्यात्। अतो गोषब्दस्य गवार्थवासना यस्मिन् श्रोतरि तस्यैव गवानयने प्रवृत्तिः। एकभाषाविदामन्यतो बोधो भवति न वेति नाशंकनीयम्। तत्र संस्कृतशब्दस्तदर्थवासनायुक्तस्य संस्कृत शब्दश्रवण एव तदर्थ प्रवृत्तिरन्यशब्दश्रवणे नैव भवति। यतो हि बुद्धिस्थत्वेन भाषान्तरीयेण शब्देनापि सामानाधिकरण्यं संस्कृतशब्दार्थस्य भवति, तथापि कार्यकारण भावस्तयोर्न स्वीक्रियते। यतः तदर्थस्य बोधे तत्पदस्य स्वरतो वर्णतो वा आनुपूर्वकत्वं गृह्यते। उक्तं च महाभाष्ये–

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
सवाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्।। [16]

एवं च विविधार्थवायकानां शब्दानां विविधानामर्थानां च बौद्धपदार्थत्वेन समानाधिकरण्ये सत्वेऽपि कार्यकारण भावस्तु नैव सिद्धयति, तादात्म्याध्यासस्य सत्वादेव अन्येनपदेन नान्यार्थस्य बोध इत्यवधेयम्। इत्थमेतावता शब्दस्यार्थस्य बौद्धत्वं स्वीकृतम्। शब्दार्थस्य बुद्धयुपारूढत्वे स्वीकृते वार्तमानिक्यां "ओदनं भुङ्क्ते" इत्यादौ क्रियायाः पूर्वं बुद्धिस्थत्वाभावात् कथं बौद्धव्यवहारः?
ओदन भोजनरूपस्यार्थस्य तदानीमेव जायमानस्य पूर्वकालावच्छेदेन बुद्धौ स्थित्यभावात् इति। इमामेव शंकां निरस्थति भर्तृहरिर्यथा।

भोजनाद्यपि मन्यन्ते बुद्धयर्थे यदसम्भवि।
बुद्धयर्थादेव बुद्धयर्थे जाते तदपि दृश्यते।। [17]

एवं च भोजनम्, भोक्ता तयोस्सम्बन्धश्च पूर्वं प्रतिपादितक्रमेण बुद्धौ न सन्तीति बुद्धिस्थत्वाभावेन न कार्यकारणता इति बौद्धार्थे स्वीक्रियमाणे "ओदनं भुङ्क्ते" इत्यादौ बोधाभाव इति वक्तुं नैव शक्यते। एवं प्रकारेण बाह्यार्थवादि नयेऽपि परम्परया बौद्धार्थसमर्थनमेव कर्तव्यं भवतीति सर्वत्र बौद्धार्थाश्रयणीयमेव विधीयतमिति भर्तृहरेराशयो दृश्यते। अनेन प्रकारेण बौद्धार्थस्य विवेचनम् शास्त्रानुसारेण मया कृतम्। एतेन कार्येण छात्राणां अध्येतृणां च साहाय्यं भविष्यतीति–शम्।

## संदर्भ


1. श्रीमद्भगवद्गीता–श्लो.सं. 4/38
2. अष्टा.पा.सू. 1/2/45
3. परमलघुमंजूषाशक्तिनिरूपणम्
4. वाक्यपदीयम् ब्रह्मकाण्डम् कारिका सं. 142
5. अष्टा.पा.सू. 1/4/24
6. वैयाकरणसिद्धान्तलघुमंजूषा–पृ. 364
7. तैत्तिरीयोपनिषत्– 3–1–3
8. अष्टा.पा.सू. – 3/41/4
9. श्रीमद्भागवतम्–द्वितीयस्कन्ध, श्लोक–33
10. वाक्यपदीयम् पदकाण्डम् कारिका सं. 31
11. वाक्यपदीयम् पदकाण्डम् कारिका सं. 32
12. वाक्यपदीयम् ब्रह्मकाण्डम् कारिका सं. 45
13. वाक्यपदीयम् ब्रह्मकाण्डम् कारिका सं. 46
14. वाक्यपदीयम् ब्रह्मकाण्डम् अम्बाकर्तृ टीका पृ.सं. 93
15. वाक्यपदीयम् ब्रह्मकाण्डम् कारिका सं. 47
16. व्याकरणमहाभाष्यम् पशपसाह्निकम् आनुषङ्गिकप्रयोजननिरूपणप्रकरणम्
17. वाक्यपदीयम् पदकाण्डम् कारिका सं. 33